# महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः, बिहारः

## मानविकी एवं भाषासंकायः

# संस्कृतविभागः

एम. ए. द्वितीयसत्रम्

## विषयः- लघुसिद्धान्तकौमुदी

Code – SNKT2001

## उपविषयः- अजन्तस्त्रीलिङ्गप्रकरणम्

डॉ. श्याम कुमार झा
सह- आचार्यः, संस्कृतविभागः
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः

पदसाधनम्

अजन्तस्त्रीलिङ्गप्रकरणम् (लघुसिद्धान्तकौमुदी)

रमाशब्दः

# प्रथमाविभक्तिः

## रमा

रमा + सु 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सूत्रेण प्रथमा एकवचनविवक्षायां सु प्रत्ययः

रमा + स् 'उपदेशेऽजनुनासिकः इत्' इत्यनेन सूत्रेण इत्संज्ञायां तस्य लोपः इत्यनेन सकारलोपे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इत्यनेन सूत्रेण स्-कारस्य लोपप्राप्ते

रमा पदसिद्धम् ।

## रमे

रमा + औ 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सूत्रेण प्रथमाद्विवचनविवक्षायाम् औ प्रत्ययः

रमा + शी 'औङ आपः' इत्यनेन सूत्रेण श्यादेशे

रमा + ई अनुबन्धलोपे

'आद्गुणः' इत्यनेन सूत्रेण गुणे कृते

रमे पदसिद्धम्

रमाः

रमा + जस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’
इत्यनेन सूत्रेण प्रथमाबहुवचनविवक्षायां जस् प्रत्ययः

रमा + अस् ‘अनुबन्धलोपे

रमास् ‘अकः सवर्णे दीर्घः’ इत्यनेन सूत्रेण सवर्णदीर्घे

रमार् ‘ससजुषो रुः’ इत्यनेन सूत्रेण रुत्वम्

‘खरवसानयोर्विसर्जनीयः’ इत्यनेन सूत्रेण विसर्गादेशे कृते

रमाः पदसिद्धम्

## द्वितीयविभक्तिः

रमाम्

रमा + अम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन
द्वितीया-एकवचनविवक्षायाम् अम् प्रत्ययः

‘अमि पूर्वः’ इत्यनेन पूर्वरूपैकादेशे कृते

रमाम् पदसिद्धम्

## रमे

रमा + औट् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण द्वितीयाद्विवचनविवक्षायाम् औट् प्रत्ययः

रमा + शी ‘औङ आपः’ इत्यनेन सूत्रेण श्यादेशे

रमा + ई अनुबन्धलोपः

‘आद्गुणः’ इत्यनेन गुणे कृते

रमे पदसिद्धम्

## रमाः

रमा + जस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन द्वितीयाबहुवचनविवक्षायां जस् प्रत्ययः

रमा + अस् अनुबन्धलोपे

रमास् ‘अकः सवर्णे दीर्घः’ इत्यनेन सूत्रेण सवर्णदीर्घे

‘ससजुषो रुः’ इत्यनेन सूत्रेण रुत्वे खरवसानयोर्विसर्जनीयः इत्यनेन सूत्रेण विसर्गादेशे कृते

रमाः पदसिद्धम्

# तृतीयाविभक्तिः

**रमया**

रमा + टा ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन तृतीया एकवचनविवक्षायां टा प्रत्ययः

रमा + आ ‘चुटू’ इत्यनेन टकारस्य इत्संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते

रमे + आ ‘आङि चापः’ इत्यनेन सूत्रेण आकारस्य एकारादेशे

रमया ‘एचोऽयवायावः’ इत्यनेन अयादेशे कृते

रमया पदसिद्धम्

**रमाभ्याम्**

रमा + भ्याम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्यये

रमाभ्याम् पदसिद्धम्

## रमाभिः

रमा + भिस् 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन तृतीयबहुवचनविवक्षायां भिस् प्रत्ययः

रमाभिः 'ससजुषो रुः' इत्यनेन सूत्रेण रुत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गादेशे कृते

रमाभिः पदसिद्धम्

## चतुर्थीविभक्तिः

## रमायै

रमा + ङे 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन चतुर्थी-एकवचनविवक्षायां ङे प्रत्ययः

रमा + ए 'लशक्वतद्धिते' इत्यनेन ङकारस्य इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपप्राप्ते

रमा + या + ए 'याडापः' इत्यनेन सूत्रेण याडागमे

रमा + यै 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धिरेकादेशे कृते

रमायै पदसिद्धम्

## रमाभ्याम्

रमा + भ्याम् 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन चतुर्थीद्विवचनविवक्षायां भ्याम् प्रत्यये कृते

रमाभ्याम् पदसिद्धम्

## रमाभ्यः

रमा + भ्यस् 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन चतुर्थीबहुवचनविवक्षायां भ्यस् प्रत्ययः

रमाभ्यः 'ससजुषो रुः' इत्यनेन सूत्रेण रुत्वे खरवसानयोर्विसर्जनीयः इत्यनेन विसर्गादेशे

रमाभ्यः पदसिद्धम्

# पञ्चमीविभक्तिः

## रमायाः

रमा + ङसि ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन पञ्चम्येकवचनविवक्षायां ङसि प्रत्ययः

रमा + अस् ‘लशक्वतद्धिते’ ‘उपदेशेऽजनुनासिक: इत्’ इत्युभयसूत्रसहकारेण ङकारस्य इकारस्य च इत्संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते

रमा+या+अस् ‘याडापः’ इत्यनेन सूत्रेण याडागमे

रमायाः ‘ससजुषो रुः’ इत्यनेन सूत्रेण रुत्वे ‘खरवसानयोर्विसर्जनीयः’ इत्यनेन सूत्रेण विसर्गादेशे कृते

रमयाः पदसिद्धम्

## रमाभ्याम्

रमा + भ्याम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन पञ्चमीद्विवचनविवक्षायां भ्याम् प्रत्यये

रमाभ्याम् पदसिद्धम्

# रमाभ्यः

रमा + भ्यस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन पञ्चमीबहुवचनविवक्षायां भ्यस् प्रत्ययः

रमा भ्यः ‘ससजुषो रुः’ इत्यनेन सूत्रेण रुत्वे ‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते

रमाभ्यः पदसिद्धम्

# षष्ठीविभक्तिः

## रमायाः

रमा + ङसि 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन षष्ठी-एकवचनविवक्षायां ङसि प्रत्ययः

रमा + अस् 'लशक्वतद्धिते' 'उपदेशेऽजनुनासिकः इत्' इत्युभयसूत्रसहकारेण ङकारस्य इकारस्य च इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपप्राप्ते

रमा + या + अस् 'याडापः' इत्यनेन सूत्रेण याडागमः

रमायाः 'ससजुषो रुः' इत्यनेन सूत्रेण रुत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन सूत्रेण विसर्गादेशे कृते

रमायाः पदसिद्धम्

## रमयोः

रमा + ओस् 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन षष्ठीद्विवचनविवक्षायाम् ओस् प्रत्ययः

रमे + ओस् 'आङि चापः' इत्यनेन सूत्रेण आकारस्य एकारादेशे

रमयोस् 'एचोऽयवायावः' इत्यनेन सूत्रेण अयादेशे कृते

रमयोः 'ससजुषो रुः' इत्यनेन सूत्रेण रुत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन सूत्रेण विसर्गादेशे कृते

रमयोः पदसिद्धम्

## रमाणाम्

रमा + आम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन षष्ठीबहुवचनविवक्षायाम् आम् प्रत्ययः

रमा + नाम् ‘ह्रस्वनद्यापो नुट्’ इत्यनेन नुडागमे अनुबन्धलोपे च न् इति शेषे

रमाणाम् ‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ इत्यनेन सूत्रेण णत्वे कृते

रमाणाम् पदसिद्धम्

## सप्तमीविभक्तिः

## रमायाम्

रमा + ङि ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सप्तम्येकवचनविवक्षायां ङि प्रत्ययः

रमा + आम् ‘ङेराम्नद्याम्नीभ्यः’ इत्यनेन सूत्रेण ङि स्थाने आमादेशे

रमा+या+ आम् ‘याडापः’ इत्यनेन याडागमे

रमा + याम् ‘अकः सवर्णे दीर्घः’ इत्यनेन सूत्रेण सवर्णदीर्घादेशे कृते

रमायाम् पदसिद्धम्

## रमयोः

| | |
|---|---|
| रमा + ओस् | 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन सप्तमीद्विवचनविवक्षायाम् ओस् प्रत्ययः |
| रमे + ओस् | 'आङि चापः' इत्यनेन सूत्रेण आकारस्य एकारादेशे |
| रमयोस् | 'एचोऽयवायावः' इत्यनेन सूत्रेण अयादेशे कृते |
| रमयोः | 'ससजुषो रुः' इत्यनेन रुत्वम् 'खरवसानयोर्विसर्जनीयः' इत्यनेन सूत्रेण विसर्गादेशे कृते |
| रमयोः | पदसिद्धम् |

रमासु

| | |
|---|---|
| रमा + सुप् | ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सप्तमीबहुवचनविवक्षायां सुप् प्रत्ययः |
| रमा + सु | ‘हलन्त्यम्’ इत्यनेन प्-कारस्य इत्संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते |
| रमासु | पदसिद्धम् |

धन्यवादः